CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.
Coll. No. 855

Title Madhva saṁpradāya Grantha saṁgraha

CHUNILAL GANDHI VIDYABHAVAN, SURAT

*Shastri Dinmanishankar Pustak-Bhandara*

No.: 855 Subject: Vedānta.

Title: Madhva sampradāya Grantha saṅgraha

Author: - Scribe: -

Date of the work: - Date of the Ms.: -

Place of the work: - Place of the Ms.: -

Size: 8.9" by 5" Extent: 40 foll.

Language: Sanskrit Script: Devanāgarī

Remarks: ——

१ ॥श्रीकृष्णायनमः॥ ॥अथस्वकीयबोधायस्वस्मरीत्या
विचार्यच॥स्वमार्गीयःप्रकारोयंसर्वोपिविनिरूप्यते॥१॥ग्र
हीतानामक्षरेणगत्वासर्वंसमर्प्यच॥सेवासार्थकतासि
द्धैदेहादीनांतथापुनः॥२॥अन्यत्राविनियोगायक्रियता
तनुवित्तजा॥तयात्मानस्थितिसिद्ध्यैसेवात्रफलरूपिणी
॥३॥साप्रकारत्रयेणेतितेषांतन्मध्यपाततः॥फलत्वमिति
तेप्रोक्ताःसेवायांतुफलत्रयं॥४॥सेवातुयासमारब्धासे
वांतेनविलक्षणा॥फलतातःप्रकाराणांपश्चाज्ज्ञातितयो
च्यते॥५॥यादृशंवरणंतादृक्प्रकारापन्नसेवना॥मानसी १

फलरूपेतितारतम्येनचोच्यते॥६॥तेप्रकारास्तुविज्ञेयाग्रं
थात्सेवाफलान्निधास्तत॥अत्रलौकिकंहिसार्थ्यमेसायुज्य
रूपोत्तमे॥७॥वैकुंठादिषुसेवायाःशरीरमधिकारकृत
॥एतावानेवमार्गेस्मिन्स्वल्पमःसिद्धांतसंग्रहः॥८॥तत्रादौ
वारणयातःकिंकर्यादितिचोच्यते॥श्रीमदाचार्यमार्गीय
गुरुणाक्षरेणगतः॥९॥स्वामित्वेनहरिंस्वंतुसेवकत्वेनभा
वयेत्॥लौकिकंवैदिकंवापिविदध्याद्भक्तिसिद्धये॥१०॥
नान्यमार्गाश्रयोनैवदेवांतरसमाश्रयः॥नैवतीर्थाश्रयोनै
वाग्निमतेःकर्तृताश्रयः॥११॥नैवमंत्रसमाधायैरोनचक

२

मादिकाश्रयः ॥ सर्वदोषनिवृत्त्यर्थं धर्मत्वेन हरौ हरिः ॥२२॥ वि
वेकादेरभावेन दैन्येनार्थित्वभावनं ॥ स्वकामपूरणार्थाय पूर्णानं
दत्ववेदनं ॥२३॥ न साधनैर्नविन्मोक्षो हरिरेव तदात्मकः ॥ तदीया
तायाः संपत्तौ मुक्तत्वेनैव चिंतनं ॥२४॥ अत एव निराकांक्षामोह
तः कृष्णसेवकाः ॥ देहादिसाधनं कृष्णः स्वरूपार्थश्चतुर्विधः ॥२५॥
एवं मनसि तत् तं चिंतनीयं प्रयत्नतः ॥ ज्ञायाश्चित्तादिषु मतिर्न
कार्याशिरणं व्रजेत् ॥२६॥ उपस्थितेषु दोषेषु सर्वेषु पथविरो
षतः ॥ सुशाकेषु प्रशाकेषु हरिं गतिमथ स्मरेत् ॥२७॥ आ
नाश्रयो नैव कार्यो नैवान्यत्र स्वतो व्रजेत् ॥ प्रार्थनां नैव कर्तव्या २

पि कर्तव्या भगवत्यपि ॥२८॥ अविश्वासो न कर्तव्यो ब्रह्मास्त्रस
निदर्शनात् ॥ लौकिके वैदिके वापि कार्ये संगं विवर्जयेत् ॥२९॥
यथा कथंचित्कर्तव्ये भारवत्तत्र भावनं ॥ सर्वत्र मम तात्पर्यं
सर्वकार्यं प्रसाधयेत् ॥३०॥ लोभं च हृदये नैव कुर्यात्साधा
दि सेवयेत् ॥ शरणस्यापि ये धर्मास्तत्सिद्धौ शरणं व्रजेत् ॥३१॥
विवेकधैर्ये अपि सदा श्रीकृष्णाश्रयपोषिके ॥ तदर्थं योग्यता
त्यापि प्रयत्नाद्धृदि भावयेत् ॥३२॥ एवमाश्रितधर्मायं संक्षेपेण
निरूपितः ॥ आश्रित्य वल्लभाचार्यान्बुद्ध्वैवं कृष्णमाश्रयेत् ॥३३॥
अतः परं क्रमेणैव जीवाः कृतसमर्पणाः ॥ तत्साधनाय सततं किं

२ कृयादिति चोच्यते ॥ २४ ॥ सेवासंस्काररूपत्वादिदधासेवनांस
दा ॥ ब्रह्मसंबंधिता जीवदेहसंबंधिवस्तुषु ॥ २५ ॥ सर्वदोषविमुक्त
त्वं स्वस्मिन्नपि विभावयेत् ॥ सर्वथा सर्वदैवापि नचाद्यादसम
र्पितं ॥ २६ ॥ तद्ग्रहणेन वेदेवा ब्रह्मसंबंधिवस्कतं ॥ सर्वत्र ब्रह्म
संबंधभावनात्राण एव हि ॥ २७ ॥ लौकिकं वैदिकं वापि क्रियत्सर्वं स
मर्पितैः ॥ अतः सर्वेषु कार्येषु कुर्यादादौ समर्पणं ॥ २८ ॥ यथा स
मर्पणे योग्यं यत्तथा तत्समर्पयेत् ॥ यज्ञादिषु विवाहादौ दोषदर्श
निखिलं हरेः ॥ २९ ॥ गृहीत्वैव तदादेशं पश्चात्कार्याणि साधयेत् ॥
न स्वार्थमनुक्तं कृष्णाय समर्थमिति निश्चयः ॥ ३० ॥ नसामिभोगः सर्व ३

सोऽह्यसमर्पितवर्जनात् ॥ तथापि मानसं पूर्वमादाय च समर्प
णं ॥ ३१ ॥ अनुक्तमप्यतो ब्रह्मसंबंधीति च मा स्मरा ॥ गृह्णीया
द्वशिष्टं तु पश्चात्तेपि समर्पयेत् ॥ ३२ ॥ तदर्थं वर्जितं नेदेनार्थमनु
क्तसमर्पणं ॥ असमर्पितवस्तूनां मात्र सामान्यमुच्यते ॥ ३३ ॥
अनुक्तेत्यनेनात्र भोग्यवस्तुभोगो निरूप्यते ॥ सोचाप्युपयोगरू
पो हि तस्माद्देहो विबुध्यतां ॥ ३४ ॥ निवेदितपदार्थानां ग्रहणं
मार्गभेदतः ॥ पूजामार्गनिषेधानामत्रानवरो मतः ॥ ३५ ॥ एवं ज
न्मावधि त्यागं भावनातो न विष्यति ॥ सर्वत्र ब्रह्मसंबंधे गणा
तोस्म जडेष्विव ॥ ३६ ॥ चिंतानिवेदिभिर्नैव न वरत्नं निरूपिता:

६ ततएवावगन्तव्योदकार्यादितिविनिश्चयः॥३७॥ततोहिजातसंस्का
रःसर्वचिंताविवर्जितः॥साक्षिवत्प्रकृतिंपश्यन्सुखंसेवाप
रोभवेत्॥३८॥सेवाविधिःसमग्रोपिक्रमेणैवविलिख्यते॥प्र
कारेणमतःपूर्वंमूर्त्तौपूजाविधीयते॥३९॥मूर्त्तौभगवतो
ज्ञानंसाकारावेशतोमतं॥भक्तिमार्गप्रकारेणज्ञानंतत्कृत
दात्मता॥४०॥पूजामार्गेभवेन्मंत्रविधानात्पूज्यवेशनं॥विशेषो
भक्तिमार्गीयंपुरुषोत्तमरूपिणः॥४१॥मणिसंसर्गेणताम्रादि
सौवर्णमिवतत्त्वता॥स्मृतस्तत्रकृतंसर्वंसाक्षात्कृष्णेकृतंभ
वेत्॥४२॥सेवातुतस्यद्विविधात्यागात्यागविभेदतः॥त्यक्त्वा॥ ६

गेपितथात्वंहिमार्गेन्वेस्त्यागतःस्फुटा॥४३॥मार्गत्वावपिवैशे
केमानसस्त्यागउत्तमः॥त्यक्त्वात्यागपक्षेमार्गस्यमनुकूलंहि
साधने॥४४॥गृहेस्थित्वासेवनार्थंस्वधर्मेणैवसर्वथा॥कृष्णं
भजेद्यतोधर्मकरणंस्वीनयोनिता॥४५॥कृष्णमूर्त्तौपियथालु
बुद्धिभेदैःसंपूजयेद्धरिं॥पूर्वंस्थानंमंदिरादितथासिंहासनादि
दिच॥४६॥संपाद्यभोगसामग्रींहरिमुद्दिश्यपमंचतः॥प्रातरु
त्थायसर्वापिसेवापूजाविधीयतां॥४७॥सेवायांलौकिकीयुक्ति
स्तथाशास्त्रेदोनियामकः॥पूजायांतुविधिःस्नेहाविरुद्धइतिनिश्च
यः॥४८॥गुरुश्चभक्तिमार्गीयःकृष्णसेवापरायणः॥श्रीभाग

५ वतत्वज्ञोहंमादिरहितोनरः ॥४९॥ तदभावेतथात्वेतोपदेष्टो
त्रनियामकः ॥ अथाधुनिकतीर्थानामतथात्वेततोपिहि ॥५०॥
उपदेष्टारस्तथात्वेतद्गुरोरितिफलिष्यति ॥ यदिदुःसंगदोषेणै
णनान्यथाचेद्भवेन्मतिः ॥५१॥ सेवायामपियत्ताद्दृग्गुरुणोक्त
:परोविधिः ॥ सएवसर्वथानान्यःकल्पितःफलसाधकः ॥५२॥ अनु
नुद्वेगायसप्रेमकृष्णस्मृत्याविलंकृति ॥ वस्त्रैराभरणैर्वापितथो
पकारणैरपि ॥५३॥ यथास्वरूपसौंदर्यंस्वमनोरोधकंनवेत्
॥ यतोहिसेवनाप्रोक्ताचेतस्तत्प्रवणंहरेः ॥५४॥ लीलाविनिर्ण
ष्टरूपेहितदर्थंसेवनोद्यमः ॥ अतःसाधनताप्रोक्तातनुवित्त ५

जसेवने ॥५५॥ एवमन्नादिवस्तूनामुपयोगेषुसाधिते ॥ नार्यादी
नामानुकूल्यैतैःसेवामेवकारयेत् ॥५६॥ स्वयंकुर्यादुदासीनं
तयातेषांपुनःस्थितौ ॥ अप्रकीर्तिभयात्कृष्णसेवावैयग्र्यसं
भवात् ॥५७॥ स्वकृतब्रह्मसंबंधंविनाप्यहृदिसर्वथा ॥ तत्पोष
णंप्रकुर्वीतरुग्णदेहवदातुरः ॥५८॥ यद्यासुराःकृष्णसेवांक
र्तुंनिंदंतिस्वतः ॥ तदातेषांपरित्यागःकर्तव्यइतिनिश्चयः ॥
॥५९॥ भक्तिमार्गेनवस्तव्यमन्तर्के:सहसर्वथा ॥ अंगीकृत्या
पिचस्मात्तद्वर्जनंभक्तिमार्गिभिः ॥६०॥ धर्मत्रागस्त्वात्तुबलवद्भ
क्तिमार्गस्तत्रमितिस्थितिः ॥ चित्तंहरेप्रतिष्ठाप्यहृत्तियत्नंचकारये

त्।।६१।।सर्वथा तत्र भावेतु यामं सेवापरो भवेत्।।ततः सज्जनता
सिद्धेः कृष्णमात्ररतो भवेत्।।६२।।तदर्थमपि यत्नेन जातवैमु
ख्यवारणे।।श्रीभागवतपाठं च विदध्यान्नियमेन हि।।६३।।वि
त्तलोभजवैमुख्याभावाय परुषं सदेत्।।मानयेदपि कृष्णोक्त
मित्येवोत्साहसिद्धये।।६४।।वैराग्यं परितोषं च लोभाभावाय भा
वयेत्।।जन्मनो प्राप्तिवैकृतार्थत्वं च चिंतयेत्।।६५।।एवं निश्चिं
त्य चित्तेन निरपेक्षो दृढांतरः।।स्थिरांतःकरणः कृत्वा विश्वा
सं पितृवद्धरौ।।६६।।सेवयेत्तत्परो भूत्वा युक्त्या लौकिकया गु
रौ।।देहे कालो विचार्यैवमवस्थां च प्रभोरपि।।६७।।तदर्थं म



र्थवचनकृतिध्यानं परित्यजेत्।।कृष्णे समर्पयेन्नैव क्लिष्टं
क्वापि प्रयत्नतः।।६८।।इष्टं लोके तथा स्वस्य यच्चिरं चित्तचिंति
तं।।तदेव समर्पयेद्भक्त्या भक्तिसंबंधि सर्वथा।।६९।।तथानव
सरे सेवाबहिरंगेपि मुख्यवत्।।कायाबुद्धिः कृष्णकार्यवस्तु
प्रक्षालनादिके।।७०।।काले काले यथाकालं तत्रैव कुर्वीत सेवनं
।।स्वधर्ममाचरेदंगं नित्यं नैमित्तिकं तथा।।७१।।निवृत्तिरायदे
शेव विधर्मादिति निश्चयः।।धर्मसिद्धावपि न वै त्रिष्णा।
कृष्णधर्मतः।।७२।।इंद्रियाणि च विनिग्राह्य कर्तव्यः सर्वथा मतः।।
परोपकारधर्माणां दौर्बल्यं च विभावयेत्।।७३।।एवं प्रकुर्वीत कृ

७ ह्यावेशाद्यदि न वेत्तु नः ॥ तत्सेवासाधनेनिष्ठा तस्मान्नित्यं हि ।
सेवयेत् ॥ ७४ ॥ कृष्णं सर्वात्मकं ज्ञात्वा दीनतां हृदि भावयेत्
॥ अहं करोमीत्येतादृगहंकारं परित्यजेत् ॥ ७५ ॥ सेवायामि
ति सन्मानं नापेक्षेत तद्धरेः पुनः ॥ ७६ ॥ गुणानुगायेद्यो नाम
कीर्त्तयेत्सदसिस्थितः ॥ ७६ ॥ निर्णयो निस्पृहः कृष्णस्य स्वतश्चि ।
त्तं निवेशयेत् ॥ मुख्यं तु साधनं नित्यं श्रीभागवतकीर्त्तनं ॥ ७७ ॥
अहं तेनानिमित्तेन स्वप्रयत्नेन सर्वथा ॥ सेवांलगतितद्वांग
शंखचक्रादि धारयेत् ॥ ७८ ॥ चिह्नला तुलसीमाला धार्या तिल
कमेव च ॥ वैष्णवेन मतेनैकादश्यादिव्रतमाचरेत् ॥ ७९ ॥ ७

उत्सवत्वेन कृष्णाष्टम्यादीनां व्रतं चरेत् ॥ अन्येष्वप्युत्सवत्वे
न विज्ञानं सर्वथा मतं ॥ ८० ॥ निर्णयोपि तथा कार्ये जयंतीव्रत
वन्न हि ॥ एवं कुर्वन्गृहस्थस्तु कृतार्थः स्यान्न संशयः ॥ ८१ ॥ सर्वे
साधनानां साधनस्य ब्रह्मचारिणः ॥ यतेस्त्यागात्मको मार्गस्ती
र्थाटनविशेषणः ॥ ८२ ॥ स्वतंत्रः संगरहितो नित्यं पर्यटकस्त
था ॥ तद्धि नान्नप्रतिग्रादीनिर्लज्जो नाम कीर्त्तयेत् ॥ ८३ ॥ पश्यन्नु
ह्यानि चद्धरेः शांतः कृष्णपरायणः ॥ अनन्यचित्तः कृष्णैकप्रा
र्थनविप्रयोजनः ॥ ८४ ॥ एवमादेहसंपातं यतिः कुर्याद्धि चेद्द
णः ॥ क्षिप्तपाद्यदि दोषाणां संभवेत्सकलास्त्वम ॥ ८५ ॥ अन्येनैव ।

८ नैवप्रकारेणतीर्थपर्यटनंमतं॥भार्यादिबाधितिकृत्सेतुनिश्चस्या
गोविधीयते॥८६॥त्यक्त्वास्वभवनंगत्वायत्रभागवताजनाः॥ह
रिस्थानेतदीयाश्चकृष्णसेवाकथाप्रियाः॥८७॥कृष्णार्थीसर्व
थात्यक्त्वागृहंभजनबाधकं॥तैःसहैववसेत्कृष्णसेवाकृतिक
थादिभिः॥८८॥दुःसंगदुष्टवस्त्वन्नसंबंधसभयात्मना॥यतःससा
धनस्तिष्ठेत्सावधानतयादृशे॥८९॥ततःसेवाकथासक्त्यासर्व
थाबाधितिरुत्तमा॥नैकांतसंस्थितिःकार्यानादृ[illegible]बाधकसंभवे
॥९०॥रहःकत्वंहरेरेववसत्संगेपिचपास्पति॥अथवाकेवलंश्रा
स्त्रंश्रीभागवतमादरात॥९१॥त्रिकालंसेवयेद्रूपसेवावदतितस्य ८

रः॥प्रकारत्रितयाभावेप्रपत्तिरपिचोच्यते॥९२॥मदास्थानेयत्रप्र
जाप्रत्यहंजायतेपुनः॥तत्रतत्परतास्थित्याकृतार्थत्वंसदास्थि
तौ॥९३॥नन्वत्रभक्तिमार्गीयफलाकांक्षेदोनविद्यते॥कृष्णसेवात
त्परत्वास्सर्वथादेहयोगतः॥९४॥तथापिमार्गवैधर्म्यधीतेरदृढ
तोत्रहि॥चिरकालंसेवितापिमूर्तिर्वैयग्र्यसंभवे॥९५॥तद्दोष
दर्शनादाशुत्यज्यतेतदनाग्रहात्॥स्थानांतरगतोनैवफलंब्र
ह्मास्त्रदर्शनात्॥९६॥अतोनमार्गस्योत्कर्षोभक्तिमार्गस्यसंभ
वे॥नबुद्धिमांस्तत्रयतेदन्यथातुसत्तमः॥९७॥एवंमयाश्रा
येधर्मस्यथासर्वसमर्पणे॥सेवायामपिकृष्णस्यसंक्षेपेण

९ निरूपितः॥९८॥श्रीमदाचार्यचरणद्वारणैस्स्वकमद्भक्तिभिः॥
ह्यनुवादकरूपाणिज्ञात्वासर्वंविधीयतां॥९९॥समुदित
निजमार्गबोधनेनतुष्टःद्वारणागताखिलजीवसंघजुष्टः
॥निरुपधिकरुणारसैकपुष्टःकृपयतुमयिवल्लभःप्रभुर्मे
॥१००॥इतिश्रीमत्स्वमार्गीयद्वारणसमर्पणसेवादिनिरूपा
णं॥ ॥ ॥ ॥श्रीकृष्णायनमः॥ ॥पुष्टिमार्गीयसंन्यासःखलु
ध्याचार्यसंश्रयात्॥निरूप्यतेयद्विज्ञानाञ्चासतेऽनधिका
रिता॥१॥मर्यादामार्गसिन्नोवैराग्यमधिकारकृत्॥इहामुत्र
परंतत्रस्वात्मरक्षाविधीयते॥२॥श्रवणंमननंचापिनिदि ९

ध्यासनमुच्यते॥नैकत्रावस्थितिश्चापिचेतसोऽस्वास्थ्यका
रणं॥३॥मनःप्रसादसिध्यर्थमटनंनैष्टमुच्यते॥निंद्दाटनंच
वपुषोरक्षायैतत्रनरूप्यते॥४॥वेदांतश्रवणंचापिकृष्णमाहा
त्म्यबोधकं॥संसारदुःखव्याहृत्यैस्वात्मसौख्यप्रसिद्धये॥५॥मर्
ग्निनोपिपरंतत्रधर्मःकिंचिन्निरूपिताः॥वेषोपितत्रविदित
ःसंन्यासांगतयापुनः॥६॥मोक्षकामनयानित्यमवस्थानंनि
बोधितं॥प्रवेशश्चव्रहैर्नित्यःफलमंतेनिरूपितं॥७॥केवलो
ज्ञानमार्गीयःसंन्यासःस्थितिकारकः॥सत्यलोकेभक्तियुत
ःप्रवेशंचापिसाधयेत्॥८॥प्रकृतेवैपरित्यंदिरागःप्रेमात्मको

१० हरौ॥ कृष्णसेवनयासिद्धोस्यास्य साधनमुच्यते॥१९॥ सेवा कृ-
ष्णस्वरूपस्य परोक्षाध्यक्षरूपिणी॥ तद्विहत्र तावच्च परं तत्रा-
विर्भावदृश्यते॥२०॥ भावात्मकस्वरूपस्य मूर्त्याविष्टस्य वै क्वचि-
त्॥ एवं सति न तत्रास्ते सर्वथानुभवो हरेः॥२१॥ यथा स्वगणस्य
रुच्यर्थं प्रियदर्श्यान्नं विधीयते॥ यथा कृष्णः स्वानुभवं कारयिता
त्विवर्धनं॥२२॥ मृद्वाद्युरागं संपाद्य प्रेमभावमवर्धयत्॥ जात
प्रेमा हरौ रागात्सर्वं त्यजति सर्वथा॥२३॥ अतोऽधिकारभेदो-
स्ति तन्न्यासादत्र सर्वत्रः॥ किंच नास्त्यत्रात्मरक्षादरित्वं का-
ष्ठवह्निवत्॥२४॥ यथा तिरोहिते वह्नौ भस्मतां नैव काष्ठता १०

तथात्रैतत्तिरोभावेऽप्यथाभावो भवेदिति॥२५॥ श्रवणादि निषे-
धोत्र स्वास्थ्यसंपादनात्पुनः॥ एकत्रैवावस्थितिश्च निरोधस्य
न तो यथा॥२६॥ व्रजस्थानामगमनं मथुरायां स्वगोकुलात्॥
ऽटप्यटनमत्रापि पदव्यादिदर्शनात्॥२७॥ विशेषास्वा-
स्थ्यजनकं तेन तद्भिन्नमुच्यते॥ नात्र भिक्षाटनं देहरक्षा-
ये कार्यमिष्यते॥२८॥ विरहाद्देहपातार्थमत्र सर्वः समुद्यम-
ः॥ नात्र माहात्म्यबोधाय वेदान्तश्रवणं मतं॥२९॥ ज्ञानस्य बोधके
लोके स्वास्थ्यहेतुतयापि च॥ संन्यासधर्माः केऽप्यत्र न संतीत्ये-
ष निश्चयः॥३०॥ सर्वधर्मान्परित्यज्येत्येतद्वचनतो हरेः॥ बंधमा-

११ त्रनिवृत्त्यर्थमत्रवेषस्तथाविधः ॥२१॥ मोक्षैककामनानात्रदू
रेऽपिचवांछनं । तत्रबाधकसद्भावोनात्रकश्चोपिबाधकः
॥२२॥ तत्रपूर्वएवहृद्ध्यानमत्रकैवैकभावनं । तत्रकृष्णस्पवे
च्छोस्तिप्रकृतेकृष्णवेशनं ॥२३॥ तत्रनिष्कान्तानांलीलानुभा
वोऽत्रांतरोऽखिलः ॥ एवंविज्ञायवैशिष्ट्यंन्यासयोर्विपरीत
तां ॥२४॥ दुर्लभत्वंचावगत्यानधिकारंविभावयेत् ॥ त्याग
मात्रंप्रकुर्वीततज्जनःसर्वाधिकारतः ॥२५॥ प्रपंचस्फूर्त्तिरहि
तोविदध्यान्नसनेमतिं ॥ यावत्प्रपंचःस्फुरतितावन्नैवाधिको
रिता ॥२६॥ अतःस्वपुष्टिमार्गीयःसिद्धोव्रजजनेष्वहि ॥ तथा ११

चश्रीमदाचार्येष्विन्मन्त्रास्तेष्वयोग्यता ॥२७॥ अयोग्यमिच्छन्म
नुजःपततिस्वफलादपि ॥ तस्मात्स्वयोग्यतांज्ञात्वाकर्त्तव्यः
स्यान्मनोरथः ॥२८॥ स्थेयंतथैववारीत्यामनुजेनगिरात्रिशि
:॥ तन्नामैनैवधर्त्तव्यमपराधादितिस्थितिः ॥२९॥ ॥ इतिश्री
मत्स्वमार्गीयसंन्यासवैलक्षण्यनिरूपणं ॥ ॥ ॥ श्रीकृष्णा
यनमः ॥ ॥ रसात्मकस्वरूपस्यप्रादुर्भावःकथंभवेत् ॥ इह
येवास्वरूपेवातदत्रविनिरूप्यते ॥१॥ अनुरागस्कसद्
जस्तास्तामेवेतिनिश्चयः ॥ जातमात्रेतथाभावास्वचित्तश्चा
सवेष्वनः ॥२॥ कामिनीनामन्यथैवंकथंभावोनवेदिदः ॥ इ

१२ ष्टानुरागोप्यधुनानघटेतैवसर्वथा॥३॥अवतारदशायांवास्व
रूपेपिनसंभवः॥अनुरागसमुत्पत्तेःपूर्वमित्येवनिश्चयः॥
॥४॥अतःश्रवणमात्रैकरागएवावशिष्यते॥अतएवोक्त
माचार्यैःशास्त्रद्वारैवमोचकः॥५॥अंगीकृतेःशास्त्ररीतौका
रणत्वंहिगम्यते॥तत्कंचभक्तिदस्येपितदर्थित्वंविलक्ष
णं॥६॥तस्मात्तत्कृताद्धिभगवान्भक्तिंसाधयतिध्रुवं॥अं
गीकृतानामधुनासर्वथेतिविनिश्चयः॥७॥अंगीकृतिः
फलमुखद्वारेणेतितो[illegible]भवेत्॥लोकेस्थापःस्वसेवाया
मितिसंचिंतितोपहि॥८॥यदेवद्वारेणयायात्तदासेवक १२

तांभवेत्॥तदीयत्वंसेवयैवमानसेवांतरभ्रमः॥९॥द्वारेणे
चात्मसंबंधेवैलक्षण्यमपियन्मतं॥ममसर्वंहिभगवानहं
भगवतःपुनः॥१०॥सन्मासरूपद्वारेणपृथगेवनिरूपितं
॥तत्तत्त्यागात्मकत्वेनममतायानिवृत्तितः॥११॥द्वारेणत्व
तदीयत्वेप्यहंतावनिवृत्तितः॥तस्माद्देवंतदीयानांसेव
कानांचसर्वशः॥१२॥जातभावांकुराणांचतापक्लेशायु
जामपि॥मद्रूपरूपमुखतःश्रवणाज्जायतेरुचिः॥१३॥
कालश्रवणवल्लोकेसभावःपल्लवप्रभः॥कोमलत्वादि
रूपत्वाद्दृढताभावतःपरं॥१४॥ततस्तत्सेवनाच्छास्वजोप

१३ एण्ज्ञायतेहृदा ॥ सएवकलिकारूपोभावस्तत्रनिरूपितः
॥२५॥ सभावस्तापसंबंधाद्विचित्रोहृदयेभवेत् ॥ क्रमश्चस्फु
टतिप्रायःसूर्यसंबंधतोयथा ॥२६॥ ततोदिवाग्निवांतसा
वासनांहृदयेयदि ॥ तदारसःसमग्रोपिप्रादुर्भूतोदृश
हृदि ॥२७॥ यपंचाध्यायस्मरणैस्तस्यसम्यग्दानुभवःफलं ॥ आ
च्छादनंमाययैवलोकवेदप्रदर्शनैः ॥२८॥ एवंरसात्मनः
प्रादुर्भावोहृदिनिरूपितः ॥ अतःपरंतस्यमूलोपिप्रादुर्भा
वोनि[stain]रूप्यते ॥२९॥ मूर्तिर्हिभगवानुज्ञानमार्गरीत्यानि
रूपिता ॥ तस्माद्धिभगवद्बुद्धौस्थायिभावोभवेदिह ॥३०॥ १३

स्थायिभावस्वरूपंतुमत्वेतिभगवानयं ॥ वत्स्यंगेषुतथा
भाव[stain]वनंचपदादिषु ॥३१॥ स्थिरमूर्तौतथासर्वंतदंत
र्भवितेषुनः ॥ अतोभावस्वरूपस्यतदंतःस्थितिरुच्यते
॥३२॥ अतएवोक्तमाचार्यैस्तिकूंतत्रचस्थितं ॥ तस्यचस्थिर
तातत्रस्थायिभावविभावनाते ॥ एवंभगवतःप्रादुर्भावो
हृदिविभाव्यतां ॥ श्रीमदाचार्यचरणाम्बरणैस्तज्जनैस्सर्द
॥३३॥ ॥ इतिश्रीमत्स्वभोःप्रादुर्भावप्रकारनिरूपणं ॥ ॥
॥ श्रीकृष्णायनमः ॥ ॥ अथश्रीकृष्णवदनाचार्यसंश्रित
चेतसा ॥ निरूप्यतेतन्मार्गीयभक्तिर्वैविध्यमद्भुतं ॥१॥ वेद

२४ सिद्धान्तस्तत्राच विधानभक्तिः प्रतीयते॥ सृष्टिवाक्यैस्तथाः
भेदबोधकैः श्रुतिसूत्रविनिः॥४॥ माहात्म्यज्ञानभावान्यापि
श्रमाप्रतिपाद्यते॥ प्रमर्थप्रतिपाद्यत्वाच्छ्रुतेर्मोक्षोपयोगि
नी॥३॥ आत्मवश्यताततद्बोध्यतेभेदबोधनात्॥ माहा
त्म्यज्ञापनं चापि सृष्टिकर्तृत्वबोधनेः॥४॥ एषा दृष्टोपि त
थैवात्र प्रकृतिप्रत्ययोदितः॥ प्रत्ययार्थः प्रेमचोक्तं स्त्री
भावेतद्विधानतः॥५॥ भजधातोः प्रकृत्यर्थः सष्ठ एव हि
सेवनं॥ सायुज्यकाम्ययेत्युक्तेः परं तत्साधनं मतं॥६॥ प्रेमा
पि साधनं चैकस्य प्राकट्यैकप्रयोजनात्॥ एतद्विलक्ष २४

णा चान्या तादृशस्त्वत्र एव लक्षिता॥७॥ अन्यथा नैव भक्तिः
स्यादतः सात्र निरूप्यते॥ वेदेन बोधिता सापि श्रुतिरू
पाभिरेव हि॥८॥ सृष्टिवाक्यैरिवात्रापि माहात्म्यं प्रतिपा
दितं॥ सैवं विनोदतीत्याद्यैः सर्वभावनिरूपकैः॥९॥ गति
स्मितेत्यादिवाक्यैरभेदाज्ञावबोधनं॥ भावोप्येवंविधस्त
त्र यत्रात्मस्फूर्तिनाशनं॥१०॥ एषा दृष्टोपि तथात्र तः सेवाप्र
मसमाहृतः॥ परं तु मानसी सेवा स्त्रीभावः प्रेमसाधितः
॥११॥ अस्मिन्तज्ञाववैजात्यं सर्वभावप्रबोधनात्॥ अतएव
वात्र सायुज्यसद्भावं कामभोजनं॥१२॥ नैवास्ति सर्वभावे

२५ नाभेदे तदनुभावनं॥स्वतंत्रताच विज्ञेया वेदाबोधनतस्त
था॥२३॥फलानपेक्षतातोपिमंतव्यातिविचिन्तणे:॥द्वै-
विध्यमिदमेवात्रचरणस्यविभेदतः॥२४॥भक्तिभेदप्रक
श्नास्सर्वत्रविनिरूपितं॥श्रीमदाचार्यदासानांहृदयेभा
सतेपरं॥२५॥ ॥इतिश्रीमत्सन्मार्गीयभक्तिद्वैविध्यविवेक
:॥ ॥ ॥श्रीकृष्णायनमः॥ ॥भक्तिमार्गस्यमर्यादावि-
परीताविशेषतः॥विज्ञेयासर्वथायत्रपूर्वधर्मविबाधनं
॥१॥धर्मस्त्यागात्मकोयत्रप्रवृत्तौग्रहणंमतः॥सेवाचमान
सीज्ञेयापूजाकर्मविलक्षणा॥२॥धर्मादिकरणंयत्रतदा २५

ज्ञापरिपालनं॥श्रवणंभगवद्वाक्यमाविर्भूयोदितंक्रिय
ते॥३॥धर्मेयोद्धुरिरेवात्रनस्वर्गादिकमुच्यते॥साधनंभग
वन्मार्गःफलंसाधनमेवहि॥४॥फलंप्रथमतोदेयमुत्त
रेसाधनेफलं॥सेवाप्रवृत्तिस्त्यागोहिप्रवृत्तिर्दूरवर्त्तिता
॥५॥दैहिकंचाखिलंकृष्णसेवायैचतथेंद्रियं॥विरुद्ध
करणंधर्मःकृष्णेंगितविबोधतः॥६॥एतदेवार्जुनव्याजा
न्भगवान्सर्वमुक्तवान्॥येनैवकृष्णःसंबंधोधर्मःसोत्रनि
रूप्यते॥७॥दासत्वेनभक्तिमार्गोहितद्धर्मेनविधिर्मतः॥त्या
गोपिसफलःसोपियथाभगवदिंगितः॥८॥वस्तुतस्त

२६ यमेवास्यमार्गस्यत्यागउच्यते॥सेवाकृतौस्वदेहादिनिरपे
क्षत्वमादरात॥१९॥ज्ञानमार्गपरित्यागःशून्यत्वात्तस्यनिरर्थ
कः॥भक्तिमार्गपरित्यागेसर्वंभगवदर्थकं॥२०॥परमानंद
संबंधिसफलत्वंसर्वथामतं॥उपकारोपिसंस्थितेदेहादीनां
महानसौ॥२१॥सर्वत्रभगवद्बुद्धिर्भगवद्धर्मभावनात॥इंद्रि
याणांतथात्मनस्संबंधस्यविनाज्ञानं॥२२॥प्रपंचस्फूर्त्तिस
मयेप्येवंतद्विस्मृतिर्मता॥तदर्थंभगवद्धर्माःसर्वेसर्वप्र
कारतः॥२३॥श्रीभागवततोज्ञेयाःस्वाचार्यविवृतेरिह
स्मृत्यथानभवेत्स्फूर्त्तिस्तद्धर्माणांहिसंस्थितौ॥२४॥स्वानु २६

भावेनसंसारंनाशयित्वातुसर्वथा॥ज्ञापयित्वाहरेर्धर्मान्
भावंदत्वातथाविधं॥२५॥प्रकारमपिविज्ञाप्यभक्तैःसर्वं
स्वतोबलात॥प्रपंचस्फूर्त्तिसहितेविस्मृतिस्वार्थसाधकं
॥२६॥श्रीभागवतमेवात्रसर्वेषांहिगतिर्मता॥ज्ञातंतत्फ
लदंतत्रहेतुःस्वगुरुसंश्रयः॥२७॥तत्रहेतुःकृपातेषांतत्र
सान्निध्यमिष्यते॥सान्निध्येतत्रसंबंधःसेतुसेवाकृतोभ
वेत॥२८॥सेवातदिंगितकृतेःसर्वथातत्रसिध्यति॥दास
धर्मेणसेवायांविधिर्नहिनियामकः॥२९॥यथाकथंचि
त्स्वस्वामिसंतोषोत्पादनंहितं॥तस्मिंस्तुष्टेफलत्वंसर्वंसिद्धमेव

१७ नसंशयः ॥२०॥ तस्मात्स्वमार्गमर्यादां विज्ञाय व्रतदार्ढ्यतः ॥
तत्र मार्गे स्थितिः कार्या हित्वान्याश्रयतो यतः ॥२१॥ ॥ ॥इ
ति श्रीमत्स्वमार्गमर्यादानिरूपणं ॥ ॥ ॥श्रीकृष्णायनमः
॥ ॥अथ श्रीकृष्णवदनपद्मनोत्पन्नप्रसादतः ॥ प्रभुस्वरूपवि
षये किंचिदत्र निरूप्यते ॥१॥ रसो वै स इति श्रुत्या रसात्मत कृ५
योदितः ॥ तत्र कृष्णे मतिः कार्या ब्रह्मवादेन सर्वथा ॥२॥ ब्र
ह्मवादे हि भगवानानंदाकार उच्यते ॥ तन्मात्रमुखपादा
दि सर्वं तस्य निरूप्यते ॥३॥ कोटिकंदर्पलावण्यरूपं चानं
द एव हि ॥ ऐश्वर्यादिगुणाः सर्वे तद्रूपा नैव संशयः ॥४॥ तथा १७

विधाकृति ब्रह्मात्मकं त्वं जगतः स्मृतं ॥ सुखमोहि जगदाकारो ब्र
ह्माकारो निरूपितः ॥५॥ घटकुंड्याद्याकृतिभावो वाचारंभेण तो
च्यते ॥ आनंदो हि ब्रह्मवादे सर्वत्राकारबोधकः ॥६॥ न किंचि
दीदृशं वस्तु निराकारं तु यद्भवेत् ॥ साकारब्रह्मरूपत्वात्तदा
कारेण साकृति ॥७॥ अत एवोक्तमाचार्यैर्निबंधे तत्त्वदीप
के ॥ अखंडं कृष्णवत्सर्वमिति निर्गलितं वचः ॥८॥ भगवद्ध
र्मत्वात्किंनामपि तद्रूपतोच्यते ॥ सर्वस्वरूपमानंदस्तदाका
रस्तदाकृतिः ॥९॥ एवं रसात्मकं ब्रह्म साकारं ज्ञेयमास्तिकैः
२१ ॥ सच्चद्विविधः सिद्धस्तच्छास्त्रेयादृशास्तथा ॥१०॥ संयोगवि

१८ प्रयोगाख्यांशृं[stain]गारो विनिरूपितः॥ संयोगवच्च विरहः स्व
रूपात्मेति निश्चयः॥२२॥ इयानेव विशेषो हि मंतव्यस्तत्स्वरू
पयोः॥ क्रियात्मकस्तु संयोगो लोकवेदनिरूपितः॥२३॥
विप्रयोगस्तु भावात्मा केवलानुभवैकदृक्॥ भावात्मकस्व
रूपस्य भावात्मानो व्रजस्थिता॥२४॥ सदानंदैकसहितास्त
द्रूपा नहि संशयः॥ तस्य सर्वैव सामग्री मंतव्यादि तथावि
धा॥२५॥ कदाचिन्मूललीलायाः कर्तुं प्राकट्यमीश्वरः॥ श्रु
तिष्वग्निकुमारेषु तत्फलप्रापणेच्छया॥२६॥ स्वदत्तवरसा
फल्यविधानाय विशेषतः॥ स्वभावात्मव्रजजनाः प्रथमं प्रा १८

कटीकृताः॥२६॥ संयोगात्मा स्वयं जातो वसुदेवगृहे ततः॥ नं
दगेहे समागत्य भावात्मव्रजसंश्रयं॥२७॥ गोपिकाभावरू
पं स्वमोल्लानं स्वस्थितं व्यधात्॥ स्वस्थितेन स्वरूपेण सत
तं रमते व्रजे॥२८॥ श्रुतीनामग्निपुत्राणां प्रथमाधिकृतिर्य
तः॥ अतः क्वचित्क्वचित्तस्याविर्भावोत्र निरूप्यते॥२९॥
यथास्वरूपसेवायां कदाचिद्रूपदर्शनं॥ देहस्य भौतिक
त्वेन तत्रापि विबुध्यतां॥३०॥ लीलां कृत्वा प्रमाणादिफल
प्रकरणावधि॥ निरोधेन तथा विद्यां सपर्वां विनिवार्य
च॥३१॥ स्वानंदं पूरयित्वैव शरीरमनआदिषु॥ श्रुतयो

१८ ग्निकुमाराश्च निर्दुष्टानंदरूपिणः ॥२२॥ कृतास्तेषां ततो
भावं केवलं विरहात्मकं ॥ आत्यंतिकवियोगाख्यं मु-
क्तादिफलमदुर्लभं ॥२३॥ फलं दत्वा भावरूपा व्रजस्थाः
स्वस्थितां कृताः ॥ अक्रूरनयने प्रोक्ता अन्यथा भा-
वमापिताः ॥२४॥ सिद्धं विदित्वा भगवानतस्वात्मकयु
प्रयोजनं ॥ प्रायः प्राणानिति लोके तास्तत्रैवाहूयनं-
दिताः ॥२५॥ अतयो ग्निकुमारास्तु स्वात्मरूपव्रजस्थि-
ताः ॥ आत्यंतिकस्वविरहफलभाजस्तथा कृताः ॥२६॥
अंतर्गृहगताः स्वस्मिन् क्रियारूपेणावेशिताः ॥ तेषां १८

स्वावसरे स्वस्मान्निकाम्यं रमणं पुनः ॥२७॥ प्रवेश्य
नित्यसंयोगरूपेणैव अवस्थितिः ॥ भावरूपास्तु
तेनैव रूपेणेति विबुध्यतां ॥२८॥ तन्नयोः साकृतिब्र-
ह्मिमंतमं ब्रह्मवादिभिः ॥ सर्वाधारो लोकवेदप्रथितः पु-
रुषोत्तमः ॥२९॥ तदाधारोत्तरस्तस्य पंचस्तत्कृतैः पुनः
॥ जीवैरन्तैरतो ज्ञेयस्तदतीतः परः पुमान् ॥३०॥ ततः श्री
गोपिकावृंदगूढभावः परोदरिः ॥ श्रीमदाचार्यकृपया
विज्ञेयः कृष्ण एव हि ॥३१॥ ॥ इति श्रीमत्स्वमार्गमूलरू-
पणं ॥ ॥ ॥ श्रीकृष्णायनमः ॥ ॥ स्वमार्गः सर्वथा ज्ञेयः

२० सर्वेभ्योऽतिविलक्षणः॥ तत्स्वरूपं तु दुर्ज्ञेयं स्वसामर्थ्यान्न स
र्वथा॥ १॥ इति चिंतां कृपायुक्तः कृष्णः स्वास्यं चकार ह॥ प्रक
टं सर्वसामर्थ्यसहितं निधिवद्भुवि॥ २॥ सोऽवेश इति कृ
त्वा कृष्णो भावात्मको मतः॥ तथा तदास्यं संभूतं तथैव भक्तानुभ
वतोऽनुगैः॥ ३॥ तेन भावात्मको मार्गः सर्वोऽपि प्रकटीकृ
तः॥ मुख्यो हि ब्रह्मसंबंधः स्वभावात्मक एव हि॥ ४॥ भावो वि
वाहतो नार्यो यथा स्वपुरुषे भवेत्॥ तथा मम पतिः कृष्ण
इति संबंधतोऽत्र हि॥ ५॥ यथा स्वभर्तृसंबंधे तस्या निर्दुष्टता
तथा॥ भगवद्भावसंबंधे जीवाः स्वात्मवतामहि॥ ६॥ चांडा २०

लीचेद्राजपत्नीत्यादिना प्रभुणोदितं॥ पूर्वदोषस्तदा नैव
संबंधप्रतिबंधकः॥ ७॥ तस्या यथान्यसंबंधे तदनुच्छिष्टभ
क्षणे॥ स्वस्वामिभुक्तदाने च स्वदेहाद्यन्ययोगतः॥ ८॥ मदा
न्नदोषस्तथात्रापि मंतव्यं भगवज्जनैः॥ यथा मध्यस्थिता
भिः सार्पयत्यात्मानमुत्तमं॥ ९॥ तथा संबंधिभिः कृत्वा सर्वं
वस्तु समर्पयेत्॥ स्वानन्यतानुसंबंधाभावो बाधक इष्य
ते॥ १०॥ यथा संबंधिभिः साकं स्वपातिव्रत्यरक्षणं॥
तथात्र ब्रह्मसंबंधचिंतनं तादृशैर्जनैः॥ ११॥ अतस्तत्रै
व हि स्थेयं यत्र तत्संगसंभवः॥ ते तु लभ्याः स्वबंधुकल्पोतामस

२२ रात्रंश्रयसंवसेत्॥२२॥ अतस्थेयं हरिस्थान इतिप्रभुवचः

स्फुटं॥ यतोभावः सुसंरक्षो वर्द्धनीयश्च सर्वथा॥२३॥ सबी

जभावो भजनेश्चाविष्टिरहितैः सदा॥ प्रेमासक्तिव्यसनतां

लभते भजनक्रमात्॥२४॥ तदर्थं सेवनाप्रोक्ता सापित्रावा

त्मिकाद्युनः॥ तत्राप्यफलरूपोपि प्रभुर्भावात्मकोमतः॥

॥२५॥ तत्स्त्रीलापि तथाभूता मंतव्यारसकोविदैः॥ तस्मा

त्स्वेव सर्वाचार्यचरणैकप्रकाशितं॥२६॥ भावात्मकं हि वेत्त

व्यं विद्वद्भिरिह सर्वथा॥ यथाभूतं ततोजातं कार्यं चापि

तथा भवेत्॥२७॥ स्वाचार्यस्तत्कृतोमार्गस्तत्राप्यःपुरु २२

षोत्तमः॥ सर्वमत्सुखभावाद्यमितिमंतव्यमुत्तमैः॥२८॥

स्वाचार्यचरणैर्ज्ञातवरणैर्भगवत्कृतैः॥ एतावानेववि

क्षेपः सिद्धांतोतिविचक्षणैः॥२९॥ ॥ ॥ इतिश्री दासानु

दासविरचितो मार्गस्वरूपनिर्णयः॥ ॥ ॥श्रीकृष्ण॥॥

अथ श्रीवल्लभाचार्यकृपया विनिरूप्यते॥ तन्मार्गनिष्ठ

कर्त्तव्यं स्वसंतोषाय सर्वथा॥१॥ सेव्यः कृष्णः सदानंदो न

क्लैकदृढयाश्रयः॥ तद्भावात्मा तथाभूत सर्वलीलायुतः

सदा॥२॥ अनुरागस्त्रिधा लोके श्रवणाद्दर्शनात्तथा॥ ता

सां यः सहजोरागः स एव भगवान्स्वजेः॥३॥ नंदसद्मभवेनेजातः

२२ सुखास्वादनायभूतले॥ तत्स्वरूपं तथा वक्तुं श्रुतयोपि ह्नने
श्यते॥४॥ यतो निवृत्तिर्वचसां मनसा सह रूपिता॥ किंश्री
दाचार्यचरणप्रसादात्तन्निरूपितं॥५॥ अर्थं बुध्वा स्वबु
द्ध्येवमयाकिंचिन्निरूप्यते॥ गोपिकानामेवभावः स यशो
दांकसंस्थितः॥६॥ यशोदापि च तद्भावरूपैवेति विबुध्य
तां॥ नंदस्तदीयस्तद्भूमिस्तरूढं तद्धनं च तत्॥७॥ ततोऽस
वस्तथा सर्वं तत्र तद्भाव एव हि॥ सोति गुप्तो बहिः स्थातुं
न शक्नोतीति मेलनं॥८॥ पूर्वरूपेणैनैवास्थित तो भेदनि
रूपणं॥ अस्याप्तिः केवलस्येति स्पष्टं मेव निरूपिता॥९॥
२२

अतो हि गोपिकाभावः सामग्रीसहितस्तथा॥ प्रकटः सन्तु
ष्टे चक्रे लीलां स्वानंदरूपिणीं॥१०॥ अवतारचरित्रं यत्पू
तनामारणादिकं॥ प्रादुर्भूय स्वयं कृष्णः पुनः सर्वं चकार
ह॥११॥ तदेव रूपितं सर्वं तत्र प्रकरणे त्वमे॥ कस्माच्चिंतु
तनायंत्या इति संदर्भितस्तथा॥१२॥ अतो हि भावरूपत्वं ली
लामात्रस्य युज्यते॥ यथाश्रीकृत्यागुणद्वारा गुणवानपि
रूप्यते॥१३॥ तथा भगवतेनापि सहजं तन्निरूप्यते॥ अत्र
वतीर्णचरित्रेण विभेदज्ञापनं तयोः॥१४॥ तदपि श्री
मदाचार्यरूपयेव विबुध्यते॥ तस्मात्सेवैव कर्त्तव्या भा

२३ वसेवाहिमानसी॥१५॥स्वभावोदुर्लभस्तस्यकथंसेवान्नवे
दिह॥इतिचेत्तत्रयुज्येतसमाधानमिदंपुनः॥१६॥भावो
हिसहजःसिद्धःस्वामिनीष्वेवसर्वथा॥तस्यचान्यस्थिता
स्वात्रकथंस्वद्यागतिर्भवेत्॥१७॥नवातथाविधान्येषांर्ये
ग्यतातेनकल्पितां॥अतस्तासांप्रसादेनकथंचित्तुन
वेदपि॥१८॥हरेरिवनरस्यास्यकाष्ठ्यविनंतत्प्रसादनं॥
तस्मात्कृपानिधिःकृष्णःस्वास्यमाविश्यकारहि॥१९॥स्वा
मिनीहृदयस्थस्यभावरूपस्ययन्मुखं॥भावाग्निरूपंतद्वा
क्यंस्वभावोविरहात्मकः॥२०॥तद्गानायतदात्मास्यसान्निध्या २३

फलभावनः॥अस्यत्वनुःसदाश्रीमदाचार्यःशिरसिस्थित
ः॥२१॥तन्निवेदनेतस्यसन्निधानाद्भवेदसौ॥भावस्तर्थ
विधोमुख्यसेवासाधनतांगतः॥२२॥तत्सिद्धिर्गोकुलाधी
शेसर्वस्वस्यसमर्पणात॥तत्सिद्ध्यतिस्वसर्वस्वविनियोगे
नसर्वथा॥२३॥तदर्थंकायिकीसेवातनुवित्तयुतोदिता
॥एवंतन्मानसःसर्वंकुर्वन्नुचिंताविवर्जितः॥२४॥सेवा
परस्तथाकुर्वन्वियोगानुभवंहृदा॥सेवानवसरेयथा
शोचारणागतेहरेः॥२५॥संन्यासेनविधेयास्मादनुभूति
ःपराङ्गनः॥आत्यंतिकवियोगस्यपराकाष्ठाफलस्यसा॥

२६ ॥२६॥एवंविज्ञायविधिनाविहिताचाःसदादृतः॥आश्रित्य
वल्लभाचार्यंस्थिरंतिष्ठेत्समाहितः॥२७॥इतिश्रीवल्लभाचा
र्यप्रसादेननिरूपितं॥सतांसंतोषतःस्वांतेस्थापनीयंप्र
यत्नतः॥२८॥ ॥ ॥इतिश्रीस्वमार्गीयकर्त्तव्यनिरूपणं॥
॥॥श्रीकृष्णायनमः॥ ॥प्रपंचोभगवत्कार्यस्तथानित्य
स्तदात्मकः॥सर्ववेदांतवेद्योहितदंतःस्थितिरक्षरः॥१॥
कूटस्थःसच्चिदानंदोव्यक्तोव्यक्तसमाश्रयः॥पुरुषोत्त
मरूपांघ्रिस्तत्रलोकस्तस्यवासनं॥२॥तदंतस्थोलोकवेद
प्रथितःपुरुषोत्तमः॥सरसात्मतयाप्रोक्तःशृंगारःसर्व २६

संमतः॥३॥सद्विधासंगविरहाभ्यामित्येवप्रतीयते॥संयो
गात्मायथानंदाकारःश्रुतिनिरूपितः॥४॥सर्वलीलाश्री
सामग्रीसहितोभक्तसंयुतः॥तदंतःस्थोवियोगात्माभग
वांस्तथाविधः॥५॥तस्ययाकाचिदेवास्तिसामग्रीसा
पितादृशी॥तद्रूपातुभवेत्पश्चात्इंद्रियैरपितत्थाविधैः॥६॥
भावात्मकत्वाद्रूपेसतस्यसेवापिमानसी॥तस्यायागोपि
भावेनलीलान्निर्विरहात्मनः॥७॥सर्वांतरंचैतदेवरूपंसं
क्षिप्यविबुध्यतां॥श्रीमदाचार्यचरणैःश्रुतिसारंप्रकाशितं
॥८॥तदर्थंब्रह्मसंबंधोभावःसेवाधिकारकृत॥भावेनभाव

सेवायांभावरूपस्यमत्प्रभोः॥९॥यःसर्वांतर्गूढभावःस्थायित्व
त्वेनिरूपितः॥तस्यास्तिनविसंप्राप्तिर्नान्यदिषेत्येवनियः
॥१०॥ ॥इतिश्रीमत्प्रभोःसर्वांतरत्वनिरूपणं॥ ॥ ॥ ॥
॥श्रीकृष्णायनमः॥ ॥अथश्रीआचार्यचरणावलंबनबला
न्मया॥पुरुषोत्तमरूपाविर्भावेकिंचिन्निरूप्यते॥१॥रसा
त्मकःश्रुतिशिरःसिद्धःसपुरुषोत्तमः॥रसःशृंगारएवास्ति
नात्रसिद्धांतसंमतेः॥२॥अन्येषुरसतांनैवमन्यंतेनरता
दयः॥शृंगाररससंबंधादन्येपिस्युरसाइति॥३॥यथैवोपकृ
तिःसर्वामहतांस्वर्णनिर्मिता॥शृंगाररसतथाकार्येरसाए



वोपयोगिनः॥सएवश्रुतिवाक्यैकवाक्यताबलतःस्फुट
॥साकारसच्चिदानंदोविरुद्धाखिलधर्मधृक्॥५॥रूपवा
नखिलाधारोऽनंतशक्तिःस्वभावतः॥अप्राकृतनिजानं
दरूपदेहेंद्रियादिकः॥६॥सगुणस्त्वेद्विविधःप्रोक्तःसंयोगो
विरहस्तथा॥रसेयथातैरतमंसंयोगाद्विरहेतथा॥७॥
तत्स्वरूपेपिमंतव्यंनक्तानुभवतःस्फुटं॥पूर्वोखिलस्वरूप
स्त्रीपक्षीयाधारस्ततोन्तरः॥८॥भावात्माभावरूपैकक्रिया
मात्राश्रयःस्मृतः॥लोकवेदप्रसिद्धोदिपूर्वस्तस्मात्तथाम
तः॥९॥श्रुतिसिद्धाऽखिलब्रह्मधर्माधारोजगत्कृतिः॥चतु

२७ थाभावरूपस्यकावाप्योत्पत्तिरुदाहृता॥२१॥अत्रतत्त्वात्म
नस्तत्त्वइतिनंदमतिस्तदा॥युज्यतेनान्यथाप्यात्सान्द्राद्
त्पन्नेमतिवर्णनं॥२२॥कथंचविहितावस्मदाचार्याणां
हियुज्यते॥वासुदेव॰स्यकमकानामंतःकरणमूर्त्ति
मान्॥२३॥तमादेशाश्रयीकृत्यभावात्मास्वकृतागम
तः॥अत्रतत्त्वस्ववगीतेषुसोऽजनत्वेकीर्तितः॥२४॥वि
हितंचतथातानिज्ञातिमित्यस्मदीश्वरैः॥एतदेवोक्त
माचार्यैर्मयियासहसर्वथा॥२५॥नंदगेहेमूलरूपःस
जातःपुरुषोत्तमः॥एतस्यैवप्रभोःपूर्वरूपस्यानकदुं- २७

द्वी२

दुभेः॥२६॥गृहेवतारःपश्चाद्योनंदगेहेसमागतः॥सए
वागतिस्सिद्ध्यर्थंबन्धुवज्ञाकृतःस्विभुः॥२७॥यश्चैषांसंगल
लितस्तत्वइतिकृतिस्वतः॥गमनानंतरंतत्रभावरूपे
णायोजनं॥२८॥अत्रतएववह्निसंयोगवियोगानुभवामत
ः॥केवलस्यततःपश्चात्सर्वस्मिन्मथुरागते॥२९॥वासु
देवोपितत्रास्तिसर्वमेकीभवत्तदा॥ज्ञानिनामपिमुक्ता
प३ नांमोहमुत्पादयत्यतः॥३०॥एवंसर्वचरित्राणांसन्निवेशो
पिसंसति॥अतोभावात्मनोलीलाक्वचिदेवानरूपि
ता॥३१॥यद्वांगनेत्यादिपद्येषुभावात्मिकामता॥ए-

२८ वंविज्ञेयमखिलंश्रीमदाचार्यसंश्रितैः॥३३॥जीवात्माक्यं
सर्वथैवयद्यप्येतन्निरूपणं॥तत्प्रसादभावेनहरिदासे
नरूपितं॥३३॥इतिकृष्णस्वरूपस्याविर्भावोत्रविवेचितः
॥विज्ञायतंतदीयास्तन्निरुद्धाःसंभवंतुहि॥३४॥ ॥ ॥
इतिश्रीपुरुषोत्तमस्वरूपाविर्भावविनिर्णयः॥ ॥ ॥
॥श्रीकृष्णायनमः॥ ॥अथश्रीवल्लभाचार्यमार्गसर्वस्व
रूपिणी॥सेवास्यसाधनासर्वाह्युप्यतेसानिदर्शना॥१॥वि
तस्तत्प्रवणंसैवमानसीफलरूपिणी॥प्रोक्तानिरोधरू
पासाबुद्धस्थैवदृश्यते॥२॥प्रमेयबलतस्तेषुनिरोधः २८

प्रभुणाकृतः॥तत्स्वरूपंतुभावेनानुभवस्तुतदात्मनः॥३॥
भावस्तुविप्रयोगेणतापक्लेशैर्विचारणं॥तदोद्भवःप्र
भोस्तत्रहृदयेस्यादात्मनः॥४॥बाह्यास्फूर्तौवियोगे
नरसेहृदयदेहगे॥रसात्मकप्रभोस्तत्रप्रादुर्भावःस्व
तोभवेत्॥५॥तेनैवप्रभुणा[illegible]सर्वलीलानुभवतोहृदि
॥रसात्मकस्वरूपस्यस्थितिस्त्वेकालिकीभवेत्॥६॥ए
वमेवस्थितिर्ज्ञेयास्वामिनीहृदयेस्फुटं॥सेवास्यदाचा
र्यवर्यैर्निमामीत्यत्ररूपिता॥७॥स्वतंत्रभक्तास्तेवाप्यये
षेवंभगवत्स्थितिः॥एवमेवहितद्भक्तेःस्वातंत्र्यंनान्यथाभवे

२९ दा॥८॥यतोनहिप्रभोस्तत्रबहिःप्राकट्यमिष्यते॥स्वतंत्राम
करघुनाथजस्त्रीषेवद्दृश्यते॥९॥रासस्थासुतथान्यत्रस्था
पितास्वमुखांबुजे॥तदाश्रयएवतान्दृण्णंतत्कृपातोभव
त्यपि॥१०॥यतोभगवताप्रोक्तंतान्सत्येवसमर्पणं॥श्रीमत्
प्रभोस्तुतद्दानमाचार्येभ्योनसंशयः॥११॥अन्येषांतत्कृपा
तस्तुभविष्यतिनसंशयः॥कृपाहिमार्गरूचैवनिश्चिता
भवतिध्रुवं॥१२॥तत्रादावधिकारत्वात्स्वधर्मंयत्समर्पणं।
॥तदाचार्येभ्यएवोक्तमतस्तद्द्वारकंफलेत्॥१३॥अतस्ते।
भ्यस्तद्विधायप्रेमसेवांप्रसाधयेत्॥तस्याधिकाररूपत्वा २९

दाधिकारिकरूपिणी॥१४॥तनुवित्तयुतासेवासमर्पणफ
लंहिसा॥समर्पणंतुभवतिविनियोगेनसार्थकं॥१५॥विनि
योगाद्भवेद्देवप्रेमासक्त्यादिचाखिलं॥कृपाविशेषाद्व्य।
सनंप्रपंचविस्मृतेर्भवेत्॥१६॥अयमेवनिरोधोहिमानसी
सेवनापिवा॥आसक्तेर्व्यसनाद्वेतुकारणत्वंहिगम्यते
॥१७॥प्रपंचविस्मृतिस्तत्रसुलभासक्तितोभवेत्॥एतदेव
स्वामिनीषुप्रभुणाविहितंपुरा॥१८॥दृष्टांतार्थंक्रमेणैव
तत्सर्वमिहरूप्यते॥प्रादुर्भूयस्वयंनंदगेहेतासांसमर्पणं
॥१९॥कारयित्वास्वयंतत्रलीलांकुर्वन्बभौप्रभुः॥आत्म

३० नंभूषयांचक्रुरित्यु त्रोक्तं समर्पणं ॥२०॥ यावत्तन्नोऽस
मर्थत्वं सुखदाने भवेत्पुनः ॥ समर्पणे फलं तावन्नाप्त्यो
ग्रोनिरूपितः ॥२१॥ आविर्भावो हि बालेऽपि स्वेष्टरूपस्य ते
नहि ॥ सर्वाभिरग्रे भाव्याभिर्लीलाभिः सुखसंभवः ॥२२॥ यु
वंगनेत्यादिभिस्तत्तदेव विनिरूपितं ॥ अ अनुक्रमेण सर्वो
पि निरोधः सुनिरूपितः ॥२३॥ निरोधेऽपि नयास्विच्छा तासां मु
क्तिर्निरूपिता ॥ अंतर्गृहगतानां तु तथा देहविधारणं ॥२४॥
प्रभ्विच्छातः स्वतो नेति स्थापयित्वेति चोदितं ॥ मुक्तिस्तु पू
र्णस्य स्वस्मिन्नित्यसंयोजनं स्वतः ॥२५॥ संयोगानुभवार्थं ३

हि ततो निष्कासनं क्वचित् ॥ अनुभूय तथा लीलास्तत्स्व
रूपे व्यवस्थितिः ॥२६॥ फलं मुक्तिस्ततो भिन्ना भगवन्नेक्ष
रादिस्थितिः ॥ यावल्लीलाकृतिर्नित्यं पूर्वरूपं वियोज
नं ॥२७॥ आत्यंतिको वियोगोऽयं सर्वत्र विनिरूपितः ॥ ए
तत्फलं तु बहुधा सेवायामपि सर्वथा ॥२८॥ दानं साधम
तः प्रोक्तं दाने चाद्य इति स्फुटं ॥ दानमानन वक्षेस्तथा
ऽन्यविद्याधिनिश्चितं ॥२९॥ तदाश्रयः सदा कार्यः सर्वभावे
न सर्वथा ॥ न विस्मृतिस्तदेकात्म विश्वासस्य समुजान्नृणां ॥३०
कृपासाधनतः सर्वं तथा चेत्तत्कृपा न वेत् ॥ मुक्तिरेव फ

३१ त्वंत्वस्य सायुज्यमिति निश्चयः॥३१॥ सायुज्यमन्तरेणैव किं
तु तत्स्वरूपोत्तमे॥ भक्तिमार्गफलेष्वेतन्मध्यमं फलमीर्य
ते॥३२॥ सायुज्यकाम्ययेत्यादि निबंधेपि निरूपितं॥ भक्तेर्दु
र्लभता चोक्ता दुर्लभेति न सोच्यते॥३३॥ सेवोत्तत्कृपातारत
म्यात्फलमुक्तमनेकधा॥ फलत्रयाधिकारो हि योग्यदेहा
दिकं तु नः॥३४॥ भक्तिमार्गीयसेवायाः साधारण्येन रूपा
फलं॥ फलत्रयेपि नैवास्ति कालादिकनियम्यता॥३५॥
एवं विज्ञाय च फलं फलसेवाश्रितैर्जनैः॥ फलदाचार्यव भा२
रणे शरणी क्रियतां सदा॥३६॥ ॥इति श्रीस्वमार्गीयसेवा ३१



फलस्वरूपनिर्णयः॥ ॥ ॥श्रीकृष्णायनमः॥ ॥अथ
३ विनिर्णयः श्रीवल्लभाचार्यचरणानुग्रहप्रसादः॥ क्रियते पुष्टिमार्गी
यप्राप्यरूपनिर्णयः॥ शृंगाररससंस्थानं स्थायिभावप्रभु
मतः॥ रसो निरूपितः [illegible] शास्त्रे यादृशास्ता
गेव हि॥१॥ न त्वबधादिनिर्बोधः क्रियात त्रापि कारणं॥
क्रियया न त्वबंधायोः शास्त्र उद्देकलोपि च॥३॥ न बोधका
स्वामिनीभावः स्वोस्माकं मन्मथः प्रभुः॥ गूढभावो हृदीस्थे
यी स्त्रीभावात्माकृपाकरः॥४॥ सुखरूपस्कृततस्थाय्ना
वीतदनुभावकः॥ भक्तसंबंधजनितस्तत्रोक्ता प्रभुरूच

३२ ते॥५॥कामाख्यं सुखमुत्कृष्टमित्यत्र विनिरूपितं॥ तस्माद्भावे
कगोगम्यत्वाच्छ्रीकृष्णत्वमुपपद्यते॥६॥ श्रुतिगूढः सदा भावा
नैवं ज्ञेयः कृपाबलात्॥ तदाश्रितैः सदा सिद्धैः सेव्यः स्व
प्रीतौ सेवया॥७॥ ॥इति श्रीपुष्टिमार्गीयस्वरूपनि
रूपणं॥ ॥ ॥श्रीकृष्णाय नमः॥ ॥समानीय स्वयं दृ
ष्ट्वा मूर्त्तिं सर्वांगशोभनां॥ कृष्णस्य बाल्यकेणावा
स्थापनं विशेषतः॥१॥ बाल्यस्यैकाकिनीमूर्त्यां तद्दि
तीयामथापि वा॥ यतो मूलचरित्रं हि बाल्यकैशोरयोः
कृतं॥२॥ स्नापयित्वानुविधिवत्पंचामृतजलादिभिः॥ ३२

ग्रं खेन च ततः पश्चाच्चंदनेनानुलेपनं॥३॥ घनरूक्षस्य
जलेनापि स्नापयित्वा तदुत्तरं॥ संप्रोंछ्य सूक्ष्मवस्त्रे
ण स्थापयेदासनोपरि॥४॥ प्रार्थयित्वा निजाचार्यान् ध्या
सं४ त्वा तद्धृदि स्थितं॥ भावात्मकं परं रूपं सर्वलीलायुतं स
दा॥५॥ लक्ष्मीसहस्रसंसेव्यं तापकेलायुतान्वितं॥ बध्वां
जलिं तथा स्तुतः पवेच्च तदनंतरं॥६॥ स्वप्रसादजोंघ्रिम
णिमानीत्यादिन्यासपूर्वकं॥ विज्ञाप्य स्वामिनीरक्षावृतं
गस्यापि तत्प्रयुक्तिः॥७॥ रक्षाभिषेण विहितं भावात्मस्था
पनं स्फुटं॥ स्वाचार्यसंश्रितैस्तन्मूर्त्तावपि हरिस्थितिः॥८॥

३३ इदमेवोक्तमाचार्यैर्भक्तिमार्गप्रकारतः ॥ तत्रच स्थिता-
मित्यादि सद्भावात्माहरिर्मतः ॥ १९ ॥ पवित्वा तु त्रिरात्र
त्वाश्रृंगारं रचयेत्तदा ॥ वस्त्रैरभरणैर्वापि श्रेष्ठमार्गसौंद
र्यलक्षकैः ॥ २० ॥ आस्तीर्य वस्त्रे विधिवदासनं तत्र भाव
येत् ॥ तदुत्तरीयवस्त्राणि ततस्तामुपवेशयेत् ॥ २१ ॥ त
दृशनिति तत्र तस्यै पद्मयुग्ममुदीर्य च ॥ ततः समीकृतं
सम्यग्गोदनव्यंजनादिकं ॥ २२ ॥ भावयित्वा तु तत्र स्वा
मिनी विहितार्चनं ॥ इत्यादिकृत्यं निजाचार्यनिर्देशेन्यवाने
कतत्परः ॥ २३ ॥ स्वयं समर्पयेत्सर्वमाचार्यद्वारकं जनः ॥ ३३

तांबूलमुक्तमंदग्धादाचामप्रोंछ्य चाननं ॥ २४ ॥ ततश्च
त्वायपचकेरोसंयोज्यविधिवत्सवेत् ॥ कृष्णाश्रयाद्यंनि
स्तोत्रं प्रणमेद्दंडवद्भुवि ॥ २५ ॥ अदंभः सर्वथापेक्ष रहि
तः करुणापरः ॥ विचार्य वरणं श्रीमदाचार्यपदसंश्रयः
॥ २६ ॥ सेसेवकाय शुद्धाय सततं धयतात्मने ॥ ब्रूयच्छेत्तस्व
रूपं तु फलरूपं तेयाश्रुनः ॥ २७ ॥ भक्तिमार्गस्थितेः श्री
मदाचार्यचरणाश्रितेः ॥ सेव्यमानं सदाभावैर्निरोधं सा
धयेत् ध्रुवं ॥ २८ ॥ ॥ ॥ इतिश्रीमद्भक्तिमार्गीयस्वरूपस्था
पनप्रकारः ॥ ॥ ॥ श्रीकृष्णायनमः ॥ ॥ अथश्रीवल्ल

३५ भाचार्यचरणाब्जप्रसादतः॥ स्वभागस्सेव्यरूपस्यचिंत
नेरीतिरुच्यते॥१॥ विपिनेविपिनेवृक्षलतादिषुविशेष
तः॥ परिभ्रमंतीविरहेविकलाभोपवालिका॥२॥ विस्त
स्तवसनाश्रुच्छुरसनारसनायिका॥ विकीर्णकेशास
वेषानाथनाथेतिवादिनी॥३॥ स्खलत्स्पदयुगाऽङ्गःख
मुकुमीलितलोचना॥ लसत्स्वच्छपदांभोजचिह्न
र्शनकातरा॥४॥ दृष्ट्वादावाग्निविशिखानिःश्वासय
त्नणातुरा॥ धरणीपतितात्यंतविरहाकुलचेतना॥५॥
हृदिग्राउर्न्नवध्नावदृष्टगोकुलनायका॥ नाथोत्या ३५

पयमामेवंमुकुर्विल्कवदादिती॥६॥ विचाररहितावित्ता
चिंताकुलितमानसा॥ मनोजगूढभावात्मप्रियप्राक
द्यकांक्षिणी॥७॥ समस्तलीलानुकृतिकृतिस्वप्रियभावु
का॥ कोटिकंदर्पलावण्यभावरूपप्रियाश्रिया॥८॥ नित्य
लीलाश्रयानित्यरतिसेवनतत्परा॥ परामार्जतमप्रेमभक्ति
स्तुत्यंकजादरा॥९॥ भावनीयानित्यमेवंस्तुतामस्वामिनी
हरेः॥ तदेकहृदयस्थायीतद्भावःकृष्णएवहि॥१०॥ लीला
संदृब्धवलितासामग्रीसहितस्तथा॥ भावनीयसदानं
दः संदानंदादिलालितः॥११॥ इदमेवोक्तमाचार्यैःसिद्धांत

३५ स्यनिरूपणे ॥ आत्मानंदसमुद्रस्थं कृष्णमेवेति यद्वचः ॥२२॥
तदाशयस्तु विवृतः कृपयैव प्रभोर्मया ॥ अथ वंगल्यजना
:सर्वे चिंतयंतु हरिं सदा ॥२३॥ ॥इति श्रीमत्स्वनोश्चिंतना
प्रकारः ॥ ॥ ॥ कृष्णाय नमः ॥ ॥सदाश्रुतिनां कृपयामूल
रूपप्रस्तूकिः ॥ रसात्मकस्वरूपात्मगोपीजनसमन्वितं ॥१॥ तथा तः।१५
मूर्त ब्रजश्रीमज्जोवर्द्धनविलासकृत ॥ यथाह्यग्निस्तु तान्सा
वनि कृपया कोसलेंद्रतः ॥२॥ अनुग्रहस्य स्वरूपात्स्व मन
ष्काविर्गं विधायच ॥ तदा तद्रूपतापन्नि मूललीला प
रायणाः ॥३॥ यथा वा पूर्वरूपे पि स्वयमाविश्य सर्वतः ३५

स्व

मूलरूपेण कृतवान् लीलां तद्वत्स्वयं हरिः ॥४॥ तथा श्रु
तिषु सर्वासु नावात्मस्वीयरूपिता ॥ संपाद्य मूलरूपेण
रमते ताहृत्रीषु हि ॥५॥ आश्रयत्वं यथा भावे प्रभोस्तत्रत
थात्र हि ॥ अनयोर्न विरूपत्वं मंतव्यं ब्रह्मवादिभिः ॥६॥ मुख्य
त्वाक्ति स्वरूपं तु स्त्रीभावो हरिरुच्यते ॥ तत्र स्त्रैणः पराश
क्ति भर्विांशः कृष्णमाश्रितः ॥७॥ यथा हि सर्वभावा नां कृष्ण
:स्यापि च ताहृशी ॥ विशिष्टस्यैव सर्वेषां कृष्णसहृदया
स्थितेः ॥८॥ द्वयोर्मिलितयोर्वाच्यं मन्मथत्वमनेदतः ॥ वि
पत्रत्वाद्रसस्यालंबने द्वे वि धमुच्यते ॥९॥ एवं हि संप्रायः

सर्वस्मिन्नेतमः प्रभुसंश्रिते ॥ विशिष्टे गोकुलाधीशरूपे सर्व
त्र सर्वथा ॥ १० ॥ ॥ इति श्रीमूलरूपसंशयनिराकरणं ॥ ॥
॥॥ श्रीकृष्णाय नमः ॥ ॥ जीवानां कृष्णसंबंधो भक्तिमार्गे वि
मोचनं ॥ सद्वेधा जीवविहितो भगवद्विहितस्तथा ॥ १ ॥ जीव
स्य कृष्णसंबंधो मार्गनिष्ठतया क्रमात् ॥ प्रवेशः परमानंदे
तत्र सायुज्यप्राप्तितं ॥ २ ॥ कृष्णस्यैवेच्छया या मुक्तिः सा सद्यो मु
क्तिरुच्यते ॥ न तत्र भक्तविहितः कश्चिदेव साधनक्रमः ॥ ३ ॥ अन्य
त्वं तत्कृपया कृष्णो विशते स्वप्रमेयतः ॥ तदेव तत्र भवति
मुक्तता वेशानन्तरं ॥ ४ ॥ अंतर्गृहस्था सुयथा पुण्यपापक्षयः

क्रमात् ॥ एवमस्या स्तु तथा वेशाद् भवन्मुक्तताक्षणात् ॥
॥ ५ ॥ अनेनैव प्रकारेण ज्ञातव्या मोक्षयोर्भिदा ॥ जीवस्य भ
गवत्प्राप्तिः पूर्वा भगवतः परा ॥ ६ ॥ अत एवास्मदाचा
र्यैः [illegible] कृष्णसंन्यासनिर्णये ॥ बहिर्मुखे स्वकर्तुः स्वातंत्र्या
दिना मुक्तिलक्षणं ॥ ७ ॥ ॥ इति श्रीस्वमार्गीयमुक्तिद्वैवि
ध्यनिरूपणं ॥ ॥ श्रीकृष्णाय नमः ॥ ॥ भक्तिर्द्विधा प
दांभोज वदनांबुजभेदतः ॥ प्रथमा श्रीतलाद् भक्तिर्यतः श्रव
णकीर्तनात् ॥ १ ॥ तत्रैव सुखसंबंधः सुलभा नारदादिषु ॥
द्वितीया तु लभ्यत्वा यस्मादधरामृतसेवनात् ॥ २ ॥ तद्भावभाव

३७ नारूपाविरहानुभवात्मिका॥गोपस्त्रीमंतिनीघेवसादृत्ता।
हरिणास्वतः॥३॥तदर्थंकिरूणः कृष्णोभावात्मास्वासमुत्त
मं॥भावाग्निरूपंजगतिकृपयाविश्वकारसः॥४॥श्रीवल्ल
भाख्यानाचार्यान्विश्वोद्धारकृतेयतः॥दर्शयित्वास्ववद
नंवचनामृतबिंदुभिः॥५॥वेणुनादैर्विस्तीयान्पाययि
त्वाधरामृतं॥मुखारविंदरूपांतांभक्तिभावात्मिकांददौ
॥६॥तथाविधस्ववदनभक्तिदानेनचाऽखिलात॥दैवजी
वानंतरंगान्कृताथीविदधेहरिः॥७॥एवंविधस्वरूपा
न्श्रीवल्लभाख्यानकृपानिधीन्॥ऽश्रितोहंविनि ३७

श्चिंतऐहिकेपारलौकिके॥८॥ ॥इतिश्रीभक्तिद्वैविध्य
निरूपणं॥ ॥ ॥श्रीकृष्णायनमः॥ ॥श्रीमदाचार्यमा
र्गोयंनिस्साधनफलात्मकः॥तत्रतद्भावनंभावसाधनं
तत्स्वरूपावतां॥१॥सभावःसंगराहित्यान्नविष्यतिसर्वथा
॥संगस्यसाधनंसर्वरागाभावोगृहादिषु॥२॥रागाभावस्तु
सततंसेवयातत्स्वरूपावतां॥तत्स्वपोसाधनंस्यात्तुनवेत्तो
षणेनहि॥३॥तत्त्रोषणंतुतद्भक्तिभाववर्द्धनतोभवेत॥
भावोहिमार्गसर्वस्वंकर्त्तव्यंतत्स्मरणं॥४॥सेवापिसत
तंचिन्तनोवनात्मातदानवेत॥निवेदनंतुस्मर्त्तव्यमिति।

३८ यत्साधनंपरं ॥ ५ ॥ तादृशैरितिवाक्येनसंगस्तत्राप्यपेक्षि-
तः ॥ सएवसाधनंसंगोमोक्षोऽस्मिन्मार्गएवच ॥ ६ ॥ ममोत्त-
मेतिवाक्येनतद्भावेवृथाऽखिलं ॥ तस्मात्सर्वंपरित्यज्य
सत्संगेनसदाहरिं ॥ ७ ॥ सेवयेदांतरेणापिबाह्येनमनसा
पुनः ॥ स्वतःफलंहितत्संगंविदित्वाविदधीतहि ॥ ८ ॥ ॥
इतिश्रीमन्मार्गीयसाधनरहस्यं ॥ ॥ श्रीकृष्णायनम
ः ॥ ॥ रसोवैसइतिश्रुत्यारसरूपोनिरूपितः ॥ समंततः
स्वशास्त्रेणयथासिद्धस्तथापुनः ॥ १ ॥ द्विधापूर्वंतुसंयोगो
विरहश्चतथोत्तरः ॥ क्रियाप्रधानंसंयोगेरसोबोधाय ॥ ३८

रूपिता ॥ २ ॥ भावास्तथोत्तरेयुक्तःस्वरूपमपितादृशं ॥
भावात्मकंतुतत्त्वाग्निर्भविषाग्निर्नचेतरत् ॥ ३ ॥ सभाव
ःसर्वथापूर्वदेहंस्वेननिवर्त्यच ॥ विरहाच्छूतनंदेहं
सर्वसामर्थ्यसंयुतं ॥ ४ ॥ निष्पत्त्यूहंप्राप्तात्सवियोगादनु
वोनवेत ॥ सएवव्याप्तितःसर्वग्रंथेरोधःप्रजनुप्रियैः ॥ ५ ॥ वि
रोधस्तस्यसततंप्रपंचस्मरणेनहि ॥ तदभावोनिरोधैक
लीलयागुणगानतः ॥ ६ ॥ दैन्यभावेनयैवसासुलभाभा
वसंगतिः ॥ ब्रह्मादिदुर्लभोभावःकथंसाध्योदिमाद
शे ॥ ७ ॥ इतिचिंताकृपायुक्तस्यकारप्राउराननं ॥ तदा

४० ३९ अयादिदुःखायः सर्वेषां तापसंभवः ॥८॥ तापेन सर्वथा सर्व
परित्यागो न विष्यति ॥ परित्यक्तेऽखिले नूनं प्रपंचास्म
रणं न वेत् ॥९॥ न दस्मृतौ तदासक्तिः सर्वथैव न विष्यति
॥ आसक्तौ व्यसने जाते परं किमवशिष्यते ॥१०॥ बाधिका
सेवसततं न दुर्लभतमास्तिः ॥ अतो विधेयः सुधीया
श्रीमदाचार्यसंश्रयः ॥११॥ तस्मात्स एव मनुजैरनन्यैः सा
धनोज्झितैः ॥ सर्वदा सर्वभावेन सेवनीयस्तदाश्रितैः ॥१२
इति श्रीस्वमार्गरहस्यनिरूपणं ॥ ॥ ॥ श्रीकृष्णाय नमः ३९
स्वरूपगुणभेदेन द्विविधं गानमुच्यते ॥ स्वरूपं तु रसानं ४०

दस्तथा लीलासमन्वितः ॥१॥ गुणस्तु भगवद्धर्माः स्वरू
पोत्कर्षहेतवः ॥ ते परोक्षे हि गीयन्ते स्वास्थ्यहेतुतया
त्मनः ॥२॥ स्वरूपं तु सदानन्दं प्रत्येकावयवेस्तथा ॥ तत्र
लीलाश्रयत्वेन माधुर्येण विभाव्यते ॥३॥ निरूप्यते स
मानेषु यदा स्यात्तु न शक्यते ॥ तदा तेनैव रूपेण विर
हे तापसंयुते ॥४॥ निरूपणं रसस्यात्र माधुर्येण वा
जायते ॥ तस्मादनुभववेद्यत्वान्तद्रूपेण कथंचन ॥५॥ अ
तः संदृश्यताः सर्वाः स्वानुभूतरसात्मकं ॥ वियोगभावैः
स्वभावं वर्णयन्ति हि रितशा ॥६॥ तत्र लीलां तदंगस्यांस्य

४२ त्वास्मत्तात दंशकं ॥ अतो माधुर्यरूपेण रूपयंतीपरस्परं
॥७॥ एकाऽधरं तथैवान्यावदनं नयनं परा ॥ एवमग्रेपिवि
ज्ञेयं संपूर्णे मधुराष्टके ॥८॥ एतदेवास्मदाचार्यै रतिसु
संनिरूपितं ॥ तद्भावभावनं सिध्येदेतद्ग्रंथार्थभावना
त् ॥९॥ तद्बोधोपि निजाचार्यरूपया प्रभुकारितः ॥ ता
दृशो ज्ञापितो वापि नैवेन्नैवान्यथा क्वचित् ॥१०॥ इतिश्री
मधुराष्टकतात्पर्यनिरूपणं समाप्तं ॥ ॥ ॥ श्रीहरिः ॥ ॥